# ॥ श्री गीतामाहात्म्यम् ॥

## धरोवाच

भगवान् परमेशान भक्तिरव्यभिचारिणी ।
प्रारब्धं भुज्यमानस्य कथं भवति हे प्रभो ॥ १ ॥

## विष्णुरुवाच

प्रारब्धं भुज्यमानो हि गीताभ्यासरतस्सदा ।
स मुक्तस्ससुखी लोके कर्मणा नोपलिप्यते ॥ २ ॥

महापापादि पापानि गीताध्यानं करोति चेत् ।
क्वचित् स्पर्शं न कुर्वन्ति नलिनीदलमम्बुवत् ॥ ३ ॥

गीतायाः पुस्तकं यत्र यत्र पाठः प्रवर्तते ।
तत्र सर्वाणि तीर्थानि प्रयागादीनि तत्र वै ॥ ४ ॥

सर्वे देवाश्च ऋषयो योगिनः पन्नगाश्च ये ।
गोपाला गोपिका वाऽपि नारदोद्धवपार्षदैः ॥ ५ ॥

सहायो जायते शीघ्रं यत्र गीता प्रवर्तते ।
यत्र गीताविचारश्च पठनं पाठनं श्रुतम् ।
तत्राहं निश्चितं पृथ्वि निवसामि सदैव हि ॥ ६ ॥

गीताश्रयेऽहं तिष्ठामि गीता मे चोत्तमं मतम् ।
गीताज्ञानमुपाश्रित्य त्रीन् लोकान् पालयाम्यहम् ॥ ७ ॥

गीता मे परमा विद्या ब्रह्मरूपा न संशयः ।
अर्धमात्राक्षरा नित्या सानिर्वाच्यपदात्मिका ॥ ८ ॥

चिदानन्देन कृष्णेन प्रोक्ता स्वमुखतोऽर्जुनम् ।
वेदा त्रयी परानन्दा तत्त्वार्थज्ञानसंयुता ॥ ९ ॥

योऽष्टादशजपो नित्यं नरो निश्चलमानसः ।
ज्ञानसिद्धिं स लभते ततो याति परं पदम् ॥ १० ॥

पाठेऽसमर्थः सम्पूर्णे ततोऽर्धं पाठमाचरेत् ।
तदा गोदानजं पुण्यं लभते नात्र संशयः ॥ ११ ॥

त्रिभागं पठमानस्तु गंगास्नानफलं लभेत् ।
षडंश जपमानस्तु सोमयागफलं लभेत् ॥ १२ ॥

एकाध्यायं तु यो नित्यं पठते भक्तिसम्युतः ।
रुद्रलोकमवाप्नोति गणो भूत्वा वसेच्चिरम् ॥ १३ ॥

अध्यायं श्लोकपादं वा नित्यं यः पठते नरः ।
स याति नरतां यावन्मन्वन्तरं वसुंधरे ॥ १४ ॥

गीतायाः श्लोकदशकं सप्त पञ्च चतुष्टयम् ।
द्वौत्रीनेकं तदर्धं वा श्लोकानां यः पठेन्नरः ॥ १५ ॥

चन्द्रलोकमवाप्नोति वर्षाणामयुतं ध्रुवम् ।
गीतापाठसमायुक्तो मृतो मानुषतां व्रजेत् ॥ १६ ॥

गीताभ्यासं पुनः कृत्वा लभते मुक्तिमुत्तमाम् ।
गीते त्युच्चारसंयुक्तो म्रियमाणो गतिं लभेत् ॥ १७ ॥

गीतार्थश्रवणासक्तो महापापयुतोपि वा ।
वैकुन्ठं समवाप्नोति विष्णुना सह मोदते ॥ १८ ॥

गीतार्थं ध्यायते नित्यं कृत्वा कर्माणि भूरिशः ।
जीवन्मुक्तः स विज्ञेयो देहान्ते परमं पदम् ॥ १९ ॥

गीतामाश्रित्य बहवो भूभुजो जनकादयः ।
निर्धूतकल्मषा लोके गीता याताः परं पदम् ॥ २० ॥

गीतायाः पठनं कृत्वा माहात्म्यं नैव यः पठेत् ।
वृथापाठो भवेत्तस्य श्रम एव ह्युदाहृतः ॥ २१ ॥

एतन्माहात्म्यसंयुक्तं गीताभ्यासं करोति यः ।
स तत्फलमवाप्नोति दुर्लभां गतिमाप्नुयात् ॥ २२ ॥

सूत उवाच

माहात्म्यमेतद्गीताया  मया प्रोक्तं सनातनम् ।
गीतान्ते च पठेद्यस्तु यदुक्तं तत्फलं लभेत् ॥ २३ ॥

॥ इति श्रीवराहपुराणे गीतामाहात्म्यं सम्पूर्णम् ॥